# Prabhat Kids School, Akola 2025-26

(CBSE Affiliation No. 1130426)

Std.VIII Section : ____________ Subject : Sanskrit Marks : 80

Date : ______________ Term-I

Name :__________________________________________ Roll No. ____________ Time : 3 Hrs.

## 'क' खण्डः

## (अपठित अवबोधनम्)

**प्रश्न १ : अधोलिखितं अपठितं अनुच्छेदं पठित्वा उत्तराणि लिखत। १० अङ्काः**

विद्यालये प्रतिवर्षं वार्षिकोत्सवः सोत्साहं मान्यते। अस्माकं विद्यालये गतवर्षे दिसम्बरमासे वार्षिकोत्सवः आसीत्। तस्मिन् दिने विद्यालयः वधूरिव सुसज्जः आसीत्। घोषवादनेन अध्यक्षमहोदयस्य स्वागतम् अभवत्। छात्राः अभिभावकैः सह कार्यक्रमे भद्रवेषे उपस्थिताः आसन्। सर्वप्रथमं छात्रैः सामूहिकं सञ्चलनं, योगव्यायामस्य आसनादीनां च शारीरिकं प्रदर्शनम् समायोजितम्। तदनन्तरम् सांस्कृतिकः कार्यक्रमः अभवत्। विद्यालयस्य वार्षिककार्यकलापानां वृत्तं प्रस्तुतम्। अन्ते अध्यक्षमहोदयैः पारितोषिक-वितरणं सम्पादितम्। स्वकीयं अध्यक्षीयभाषणे विद्यालयस्य अनुशासनस्य महती प्रशंसा कृतवन्तः अध्यक्षमहोदयः इति।

**I) एकपदेन उत्तरत। (केवलं प्रश्नद्वयम्) (२ अङ्काः)**

क) विद्यालये वार्षिकोत्सवः कदा आसीत्?

ख) अध्यक्षमहोदयस्य स्वागतम् केन अभवत्?

ग) प्रतिवर्षं वार्षिकोत्सवः कुत्र सोत्साहं मान्यते?

**II) पूर्णवाक्येन उत्तरत। (केवलं प्रश्नद्वयम्) (४ अङ्काः)**

क) विद्यालये केन सह छात्राः उपस्थिताः आसन्?

ख) अन्ते अध्यक्षमहोदयैः किं सम्पादितम्?

ग) वार्षिकोत्सवस्य दिने विद्यालयः कीदृशः आसीत्?

**III) निर्देशानुसारम् उत्तरत। (केवलं प्रश्नत्रयम्) (३ अङ्काः)**

क) 'सर्वे छात्राः अभिभावकैः सह कार्यक्रमे भद्रवेषे उपस्थिता आसन्।' अस्मिन् वाक्ये अव्ययपदं किम्?

क) सर्वे ख) छात्राः ग) सह

ख) 'सांस्कृतिकः कार्यक्रमः' इत्यनयोः पदयोः किं विशेषणपदम्?

क) सांस्कृतिकः ख) सांस्कृतिकाः कार्यक्रमः ग) कार्यक्रमः

ग) तस्मिन् दिने विद्यालयः वधूरिव सुसज्जः आसीत्। अस्मिन् वाक्ये किं क्रियापदम्?

क) आसीत् ख) दिने ग) तस्मिन्

घ) 'प्रारम्भे' इति पदस्य विलोमपदं गद्यांशात् चित्वा लिखत।

क) वृतं ख) अन्ते ग) मान्यते

**IV) अस्य गद्यांशस्य कृते समुचितं शीर्षकं संस्कृतेन लिखत। (१ अङ्कः)**

Sample Paper Prabhat Kids School, Akola

## 'ख' खण्डः

## (रचनात्मक कार्यम्)

**प्रश्न २: अधोलिखितं चित्रं दृष्ट्वा मञ्जूषा प्रदत्तः पदानां सहायतया पञ्चवाक्यानि लिखत। ५ अङ्काः**



**(मञ्जूषा – अस्ति, सन्ति, सरोवरस्य, एतत्, कमलानि, कच्छपः, मण्डूकः, बकः, मीनाः, चलति, तरन्ति, उपविशति, विकसन्ति, मन्दंमन्दं, चित्रे, तिष्ठति)**

**प्रश्न ३ : परीक्षायां प्रथम क्रमाकं प्राप्तवान् इति अभिनन्दनं कृत्वा स्वमित्राय पत्रं मञ्जूषायां प्रदत्तैः पदैः पूरयन्तु। ५ अङ्काः**

**(मञ्जूषा – प्रसन्नाः, अनुजः, प्रथमः, पत्रं, तत्रास्तु)**

दिल्लीतः
तिथि :................

प्रियमित्र, (१) ...............।

अत्र कुशलं (२) ...............। अधुना एव भवतः (३) ............. प्राप्तम्। भवान् परीक्षायाम् (४) ............... आसीत् इति ज्ञात्वा सर्वे (५) ........... सन्ति।

मम शुभकामनाः। शेषं पुनः।

भवदीयं मित्रम्,
सौरभः।

**प्रश्न ४ : अधोलिखितं वार्तालापं मञ्जूषायाः सहायतया पूरयत। ५ अङ्काः**

**(मञ्जूषा – वदति, शुकः, फलानि, हरितः, चञ्चुः)**

माता – पुत्रि! पश्य, तत्र वृक्षे कः उपविशति ?
पुत्री – किम् एषः (१) ........... अस्ति ?
माता – आम्।
पुत्री – माता, शुकः (२) .......... भवति।

Sample Paper
Prabhat Kids School, Akola

परं शुकस्य (३) ............ रक्ता भवति।

माता – आम्! सः स्व-चञ्च्वा वृक्षस्य (४) ............. खादति।

पुत्री – किम् एषः अपि कूजति?

माता – नहि, शुकः न कूजति, सः (५)............

पुत्री – अतिशोभनम्, अतिशोभनम्।

**'ग' खण्डः**

**(व्याकरणम्)**

**प्रश्न ५ : अधोलिखितेषु यथापेक्षितं सन्धिं / विच्छेदं कुरुत। (केवलं प्रश्नत्रयम्)** **३ अङ्काः**

१) अद्य + अपि = ..............

२) सहसा + एव = ....................

३) .............. + ............ = स्मरणार्थम्

४) कुसुमादपि = ............+..............

**प्रश्न ६ : अधोलिखितानि पदानि निर्देशानुसारं परिवर्तयत। (केवलं प्रश्नत्रयम्)** **३ अङ्काः**

१) पाषाण (सप्तमी एकवचने)

क) पाषाणे ख) पाषाणाः ग) पाषाणाय

२) राष्ट्र (चतुर्थी एकवचने)

क) राष्ट्रः ख) राष्ट्राय ग) राष्ट्रात्

३) यान (द्वितीया बहुवचने)

क) यानम् ख) याने ग) यानानि

४) बालकः (प्रथमा द्विवचने)

क) बालकः ख) बालकौ ग) बालकाः

**प्रश्न ७ : अधोलिखितेषु वाक्येषु क्रियापदं चित्वा लिखत। (केवलं प्रश्नत्रयम्)** **३ अङ्काः**

१) सन्तः मधुरसूक्तरसं सृजन्ति।

२) गुणज्ञेषु गुणाः भवन्ति।

३) मधुमक्षिका माधुर्यं जनयेत्।

४) पिशुनस्य मैत्री यशः नाशयति।

**प्रश्न ८ : मञ्जूषातः उपपदपदानि चित्वा रिक्तस्थानानि पूरयत। (केवलं प्रश्नचतुष्टयम्)** **४ अङ्काः**

**(मञ्जूषा – पुरतः, परितः, विना, सह, रोचते)**

१) मात्रा ............ पुत्री गच्छति।

२) विद्यालयस्य ............ एकम् उद्यानम् अस्ति।

३) ग्रामं .............. वृक्षाः सन्ति।

४) विद्यां .......... जीवनं वृथा।

Sample Paper
Prabhat Kids School, Akola

५) मह्यम् फलं ..................।

**प्रश्न ९ : पदनिर्माणं कुरुत। (केवलं प्रश्नचतुष्टयम्)** **४ अङ्का:**

१) कृ + तुमुन् = ................

क) कर्तुम् ख) कृतुम् ग) कृतुमुन्

२) गम् + क्त्वा = ................

क) गक्त्वा ख) गत्वा ग) गतवा

३) अगम्य = ................

क) उप+गम् + ल्यप् ख) उप+गम ग) उप+गम्य

४) भुक्त्वा = ...............

क) भुज् + क्त्वा ख) भु+क्त्वा ग) भुक्+क्त्वा

५) नम् + क्त्वा = ...................

क) नमत्वा ख) नत्वा ग) नक्त्वा

**प्रश्न १० : विशेषण–विशेष्य पदानि मेलयत। (केवलं प्रश्नचतुष्टयम्)** **४ अङ्का:**

| **विशेषणपदानि** | **विशेष्य पदानि** |
|---|---|
| १) सुकुमारा | क) जगत् |
| २) सहजा | ख) संसारे |
| ३) विश्वस्मिन् | ग) भारतजनता |
| ४) समम् | घ) प्रकृति |
| ५) समस्ते | ङ) जगति |

**प्रश्न ११ : मञ्जूषात: अव्ययपदानि चित्वा रिक्तस्थानानि पूरयत। (केवलं प्रश्नचतुष्टयम्)** **४ अङ्का:**

**(मञ्जूषा – तथा, एव, सदा, सह, खलु)**

१) सत्यम् ........... जयते।

२) किं भवान् स्नानं कृतवान् .............. ?

३) स: यथा चिन्तयति ........... आचरति।

४) .......... भगवन्तं भज।

५) रमेश: मित्रै: ............ विद्यालयं गच्छति।

**‘घ’ खण्ड:**

**(पठित अवबोधनम्)**

**प्रश्न १२ : अधोलिखितं पठितं गद्यांशं पठित्वा उत्तराणि लिखत।** **५ अङ्का:**

अधुना आपणे वस्तुक्रयार्थम् रूप्यकाणाम् अनिवार्यता नास्ति। “डेबिट कार्ड”, “क्रेडिट कार्ड” इत्यादि सर्वत्र रूप्यकाणां स्थानं गृहीतवन्तौ। वित्तकोशस्य (बैंकस्य) चापि सर्वाणि कार्याणि संगणकयंत्रेण सम्पाद्यन्ते। बहुविधा:

Sample Paper
Prabhat Kids School, Akola

अनुपयोगा: (APP) मुद्राहीनाय विनिमयाय (Cashless Transaction) सहायका: सन्ति।

कुत्रापि यात्रा करणीया भवेत् रेलयानयात्रापत्रस्य, वायुयानयात्रापत्रस्य अनिवार्यता अद्य नास्ति। सर्वाणि पत्राणि अस्माकं चलदूरभाषयन्त्रे 'ई-मेल' इति स्थाने सुरक्षितानि भवन्ति। यानि सन्दर्श्य वयं सौकर्येण यात्राया: आनन्दं गृह्णीम:। चिकित्सालयेऽपि उपचारार्थं रूप्यकाणाम् आवश्यकताद्य नानुभूयते। सर्वत्र कार्डमाध्यमेन, ई-बैंकमाध्यमेन शुल्कम् प्रदातुं शक्यते।

**I) एकपदेन उत्तरत। (केवलं प्रश्नद्वयम्)** **(१ अङ्क:)**

क) वित्तकोशस्य सर्वाणि कार्याणि केन सम्पाद्यन्ते?

ख) आपणे वस्तूनां क्रयसमये केषाम् अनिवार्यता न भविष्यति?

ग) डेबिट कार्ड, क्रेडिट कार्ड इत्यादि केषां स्थानं गृहीतवन्तौ?

**II) पूर्णवाक्येन उत्तरत। (केवलं प्रश्नैकम्)** **(२ अङ्का:)**

क) चिकित्सालये कस्य आवश्यकता अद्यं नानुभूयते?

ख) सर्वाणि पत्राणि कुत्र सुरक्षितानि भवन्ति?

**III) भाषिक कार्यम्। (केवलं प्रश्नद्वयम्)** **(२ अङ्का:)**

क) 'सर्वत्र कार्डमाध्यमेन, ई-बैंक माध्यमेन शुक्लम् प्रदातुं शक्यते।' अस्मिन् वाक्ये अव्ययपदं किम्?

क) शक्यते ख) शुक्लम् ग) सर्वत्र

ख) 'सर्वाणि पत्राणि' इत्यनयो: पदयो: विशेष्यपदं किम्?

क) सर्वाणि ख) पत्राणि ग) सर्वाणिपत्राणि

ग) 'दु:खम्' पदस्य विलोमपदं गद्यांशात् चित्वा लिखत।

क) समर्थ: ख) बहुविधम् ग) आनन्दम्

Sample Paper
Prabhat Kids School, Akola

**प्रश्न १३ : अधोलिखितं पठितं पद्यांशं पठित्वा उत्तराणि लिखत।** **५ अङ्का:**

चल चल पुरतो निधेहि चरणम्।
सदैव पुरतो निधेहि चरणम्।।
गिरिशिखरे ननु निजनिकेतनम्।
विनैव यानं नगारोहणम्।।
बलं स्वकीयं भवति साधनम्।
सदैव पुरतो निधेहि चरणम्।।
पथि पाषाणा: विषमा: प्रखरा:।
हिंस्रा: पशव: परितो घोरा:।।
सुदुष्करं खलु यद्यपि गमनम्।
सदैव पुरतो ..................।।

**प्रश्ना :**

**I) एकपदेन उत्तरत। (केवलं प्रश्नद्वयम्)** **(१)**

१) स्वकीयं बलं किं भवति?

२) पथि विषमा: प्रखरा: के सन्ति?
३) विनैव यानं कुत्र आरोहणम्?

**II) पूर्णवाक्येन उत्तरत। (केवलं प्रश्नैकम्)** **(२)**
१) कीदृश: पशव: परितो घोरा:?
२) निजनिकेतनम् कुत्र अस्ति?

**III)भाषिक कार्यम्। (केवलं प्रश्नद्वयम्)** **(२)**
१) 'सदैव पुरतो निधेहि चरणम्।' अस्मिन् वाक्ये अव्ययपदं किम् अस्ति?
क) सदैव ख) पुरतो ग) चरणम्
२) 'हिंस्रा: पशव:' अस्मिन् वाक्ये विशेष्यपदं किम् अस्ति?
क) पशु: ख) पशव: ग) हिंस्रा
३) 'बलं स्वकीयं भवति' अस्मिन् वाक्ये क्रियापदं किम् अस्ति?
क) बलं ख) स्वकीयं ग) भवति

**प्रश्न १४ : रेखाङ्कितानि पदानि: आधृत्य प्रश्ननिर्माणं कुरुत। (केवलं प्रश्नचतुष्टयम्)** **४ अङ्का:**
१) तेषां स्वामिन: असमर्था: सन्ति।
२) गजधर: सुन्दर: शब्द: अस्ति।
३) लुब्धस्य यश: नश्यति।
४) भोजपत्रोपरि लेखनम् आरब्धम्।
५) विश्रामगृहेषु कक्षं सुनिश्चितं भवेत्।

Sample Paper
Prabhat Kids School, Akola

**प्रश्न १५ : घटनाक्रमानुसारं वाक्यानि लिखत।** **४ अङ्का:**
क) गुहाया: स्वामी दधिपुच्छ: नाम शृगाल: समागच्छत्।
ख) कस्मिंश्चित् वने खरनखर: नाम सिंह: प्रतिवसति स्म।
ग) सिंह: एकां महतीं गुहाम् अपश्यत्।
घ) परिभ्रमन् सिंह: क्षुधार्तो जात:।
ङ) दुरस्थ: शृगाल: रवं कर्तुमारब्ध:।
च) सिंह: शृगालस्य आह्वानमकरोत्।
छ) दूरं पलायमान: शृगाल: श्लोकमपठत्।
ज) गुहायां कोऽपि अस्ति इति शृगालस्य विचार:।

**प्रश्न १६ : अधोलिखितानि वाक्यानि क:, का / कं, कां प्रति कथयति। (केवलं प्रश्नचतुष्टयम्)** **४ अङ्का:**

| | क:/का | कं/कां |
|---|---|---|
| १) कल्याणं भवतु ते। | .............. | ............. |
| २) अत्र कुत्रापि छेदनं कुर्वन्ति। | .............. | ............. |

३) जना: मयि स्नानं कुर्वन्ति। .............. .............

४) अहं त्वत्कृते धर्मम् आचरितवान् त्वया मिथ्या भणितम्। .............. .............

५) सम्प्रति पुन: पुन: कूर्दनं कृत्वा दर्शय। .............. .............

**प्रश्न १७ : समानार्थकानि पदानि मेलयत। (केवलं प्रश्नचतुष्टयम्)** **२ अङ्का:**

| क | ख |
|---|---|
| १) जगति | क) नेत्रेण |
| २) प्रकृति | ख) पृथ्वीम् |
| ३) चक्षुषा | ग) संसारे |
| ४) तटिनी | घ) स्वभाव: |
| ५) वसुन्धराम् | ङ) नदी |

**प्रश्न १८ : अधोलिखितानां पदानां विलोमपदं मञ्जूषात: चित्वा लिखत। (केवलं प्रश्नचतुष्टयम्)** **२ अङ्का:**

**(मञ्जूषा – ह्य:, सार्थक:, अन्धकार:, चिन्तिता, गर्हितम्)**

१) निरर्थक: –

२) श्व: –

३) प्रकाश: –

४) प्रशंसितम् –

५) प्रसन्ना –

Sample Paper
Prabhat Kids School, Akola

**प्रश्न १९ : मञ्जूषात: समुचितानि पदानि चित्वा रिक्तस्थानानि पूरयत। (केवलं प्रश्नचतुष्टयम्)** **४ अङ्का:**

**(मञ्जूषा – जिज्ञासा, गृहीत्वा, कुरु, देहि, भज)**

१) मह्यं जलं ................।

२) मम मनसि एका ...............।

३) छात्रा: पुस्तकानि ............. विद्यालयं गच्छन्ति।

४) ............ गोविन्दम्।

५) सततं ध्येयस्मरणं ...............।

---------